संस्कृत-वार्ता:

15/02/2026

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· प्रधानमन्त्री प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् केन्द्रीयमन्त्रिमण्डलेन अर्बन्-चैलेञ्ज इति कोषस्य अनुमोदनं उच्च-गुणवत्तायुक्तानि, नगरीय-मूलसौकर्याणि दास्यति, नगराणि च देशस्य आर्थिकवृद्धेः प्रमुखानि चालकानि भविष्यन्ति।

· आर्थिकविषयेषु मन्त्रि-मण्डलीय-समितिः असम-राज्ये ब्रह्मपुत्र-नद्याः अधः देशस्य प्रथम-जलान्तर्गामी-मार्गस्य रेल्-सुरङ्गेति-परियोजनायाः निर्माणाय अनुमोदनं दत्तवती, विश्वे एतादृश्याः परियोजनायाः उदाहरणं केवलं द्वितीयमेव भविष्यति।

· गृहमन्त्री अमितशाहः देशस्य प्रथमं सेण्ट्रल् बैङ्क्-डिजिटल्-मुद्रा-आधारितां सार्वजनिक-वितरण-व्यवस्थां उद्घाटितवान् येन वितरण-व्यवस्थायां पारदर्शिता आनीयते।

· लोकसभायाः अध्यक्षः ओम बिरला वर्यः मङ्गलवासरे बाङ्ग्लादेशस्य नवनिर्वाचित-सर्वकारस्य शपथग्रहण-समारोहे भारतस्य प्रातिनिध्यं करिष्यति।

· अद्य सम्पूर्णे देशे महाशिवरात्रि-उत्सवः भक्त्या, धार्मिक-उत्साहेन च आचर्यते; राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च जनान् अभिनन्दितवन्तः।

· पुरुषाणां टी-20 क्रिकेट्-विश्वकप इति क्रीडायां, अद्य सायङ्काले कोलम्बो-नगरे भारतं पाकिस्तानेन सह क्रीडिष्यति; वेस्ट्-इण्डीज्-देशः नेपाल-देशम् नव विकेट इत्यनेन पराजित्य अन्तिमाष्ट-दलीय चक्रे प्रवेष्टुं प्राथम्यम् अलभत्।

<u>राष्ट्रम् पी. एम.-अर्बन समाह्वनकोशः</u>

प्रधानमन्त्री नरेन्द्रमोदी केन्द्रीयमन्त्रिमण्डलेन एकलक्षकोटिरूप्यकाणाम् अर्बन चैलेञ्ज फण्ड इत्यस्य अनुमोदनं कृतेति वार्तायाः प्रशंसाम् अकरोत्। सामाजिक-प्रसार-माध्यमे श्रीमोदी अवदत् यत्, उच्च-गुणवत्तायुत-नगरीय-मूलसौकर्य-प्रदानाय कोषः विपण्य-वित्तस्य, निज-

सहभागित्वस्य, नागरिक-केन्द्रित-परिष्काराणाञ्च लाभं प्राप्स्यतीति। सः अवदत् यत् अयम् उपक्रमः नगराणि देशस्य आर्थिकवृद्धेः प्रमुखानि चालकानि करिष्यतीति। अर्बन- चैलेञ्ज-फण्ड इति गृह-नागर-कार्य-मन्त्रालयस्य केन्द्र-प्रायोजित-योजना अस्ति, यस्याम् आहत्य-केन्द्रीय-साहाय्यं एकलक्ष-कोटि-रूप्यकाणि अस्ति। अस्य कोषस्य उद्देश्यं स्थिति-स्थापकानां, उत्पादकानां, सर्वसमावेशकानां, जलवायु-प्रतिक्रियाशीलानाञ्च नगराणां निर्माणम् अस्ति, येन ते देशस्य आर्थिकवृद्धेः अग्रिम-चरणस्य प्रमुख-चालक-रूपेण स्थिताः भविष्यन्ति।

अस्मात् चलायमान- वित्तवर्षात् त्रिंशत्-एदेकत्रिंशत् वित्तवर्ष-पर्यन्ततः, त्रिंशत्-त्रयस्त्रिंशतपर्यन्तं विस्तृता कार्यान्वयन-अवधिः अस्ति।

## केन्द्र-असम टनल

असम-राज्ये ब्रह्मपुत्रनद्याः अधः निर्मितस्य देशस्य प्रथम-जलान्तर्गामि-ट्विन-ट्यूब-रोड-कम-रेल-टनल इति परियोजनायाः निर्माणाय केन्द्रेण सहाय्यम् अनुमोदितम् । इयं पादोन-चतुस्त्रिंशत्प्रायः कि. मी. दीर्घः चतुष्पथ-अभिगम-नियन्त्रित-ग्रीन्फील्ड-सम्पर्केति परियोजनास्ति, यस्मिन् नद्याः अधः पादोन-षोडशाधिक कि. मी. दीर्घः ट्विन-ट्यूब-टनेल इति अन्तर्भवति, सा आर्थिककार्य-मंत्रिमंडलीय-समित्या अनुमोदिता अस्ति।

## गुजरात-अमित शाहः

कृषकाणां, पशुपालकानां, मत्स्यकारिणां च हितं सर्वेषु अन्ताराष्ट्रिय-व्यापारसमन्वयेषु रक्षितं भवेदिति सुनिश्चितं कृत्वा कृषि-समुदायं प्रति नरेन्द्र-नरेन्द्रमोदी-सर्वकारस्य प्रतिबद्धतां केन्द्रीय-गृह-मन्त्री अमितशाहः पुनः दृढीकृतवान्। अद्य गुजरातस्य गान्धीनगरस्य महात्मा मन्दिरे देशस्य प्रथम- केन्द्रीय-बैङ्क्-डिजिटल्-मुद्रा इत्याधारितायाः सार्वजनिक-वितरण-व्यवस्थायाः उद्घाटना-नन्तरं मन्त्री सम्बोधयन् आसीत्।

मन्त्रिणा विश्वासः प्रकटितः यत् नूतन-डिजिटल-टोकन इत्याधारित-वितरण-व्यवस्था सार्वजनिक-वितरण-व्यवस्थायाः अन्तः भ्रष्टाचारं निवारयिष्यति, वितरण-प्रक्रिया-याञ्च आवश्यकं पारदर्शितां आनयति। एतैः प्रयत्नैः सप्तविंशतिः कोटिजनाः सफलतया दारिद्र्य-रेखाम् अतिक्रमितवन्तः इति सूचयन्, श्री शाहः विगतदशके सर्वकारस्य दरिद्र-समर्थक-उपक्रमानपि अधोरेखितवान्।

## ओमबि. बाङ्ग्लादेशस्य शपथग्रहणे

लोकसभायाः अध्यक्षः ओम बिरला वर्यः अस्य मासस्य सप्तदश- दिनाङ्के ढाका-नगरे बाङ्ग्लादेश-नेस्नलिस्ट-पार्टी इत्यस्य अध्यक्षस्य तारिक-रहमानस्य नेतृत्वे बाङ्ग्लादेशस्य नवनिर्वाचितस्य सर्वकारस्य शपथग्रहणसमारोहे भारतस्य प्रतिनिधित्वं करिष्यति। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् अस्मिन् महत्त्वपूर्णे कार्यक्रमे अध्यक्षस्य सहभागिता भारत-बाङ्गलादेशयोः जनानां मध्ये प्रगाढां चिरस्थायीञ्च मैत्रीम् अधोरेखिष्यतीति।

## राष्ट्रपति-उपराष्ट्रपति-प्रधानमंत्री- महाशिवरात्र्याः

राष्ट्रपतिना द्रौपदी मुर्मु इत्यनया, उपराष्ट्रपतिना राधाकृष्णनवर्येण, प्रधानमन्त्रिणा नरेन्द्रमोदिना च नागरिकेभ्यः महाशिवरात्र्याः शुभाशयाः प्रेषिताः। राष्ट्रपतिः द्रौपदी मुर्मु वर्या स्वसन्देशे प्रार्थयत् यत् सर्वेषु नागरिकेषु भगवतः शिवस्य कृपा तिष्ठेत्, भारतञ्च प्रगतिपथे निरन्तरतया प्रवर्तेतिति। उप-राष्ट्रपतिः सामाजिक-माध्यमे अवदत् यत्, काशीतः रामेश्वरं यावत् अयं पवित्रः उत्सवः राष्ट्रस्य नैतिक्याः अविच्छिन्नायाः आध्यात्मिकतायाश्च परम्परायाः सजीव-प्रतीकरूपेण वर्तते इति। महादेवस्य, पार्वतीदेव्याः च आशीर्वादः नागरिकेभ्यः सुखम्, समृद्धिः, सुस्वास्थ्यं च आनयेदिति राधाकृष्णन् वर्येण प्रार्थितम्। प्रधानमन्त्रिणा स्वस्य सन्देशे आशा प्रकटिता यत् सर्वे नागरिकाः भगवतः शिवेन अनुग्रहीताः सन्तु, देशः समृद्धेः शिखरे उपविष्टः भवेदिति च।

## प्रधानमन्त्री राहत योजना

सर्वकारेण पी. एम. राहत इत्युक्ते प्रधानमन्त्री मार्ग-दुर्घटना-पीडित-चिकित्सालयीकरणम् अथ आश्वासित-उपचारमिति योजनायाः आरम्भस्य घोषणा कृता अस्ति। योजनायाः अन्तर्गतं, मार्गस्य कस्मिन् अपि वर्गे प्रत्येकं योग्यः मार्गदुर्घटनायाः पीडितः, दुर्घटनायाः दिनाङ्कात् सप्तदिनपर्यन्तं, प्रतिर्हिंसितं एकलक्ष-पञ्चाशत्-सहस्र-रूप्यकाणि यावत् साक्षात् धनस्य अधिग्राही भविष्यति। मार्ग-परिवहन-राजमार्ग-मन्त्रालयः अवदत् यत् निर्णयोऽयं मार्गदुर्घटनायाः अनन्तरं तत्कालीनेन चिकित्सासहायस्य अभावेन न जनहानिः भवेदिति सुनिश्चितं कर्तुं सर्वकारस्य प्रतिबद्धताम् आवर्तयति।

प्रधान-टी. एम. सी. शिक्षाः

केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः ह्यः कोलकता-नगरे शिक्षक-सम्मेलन-समये तृणमूल-काङ्ग्रेस् सर्वकारस्य उपरि कठोरा-क्रमणं कृतवान्, राज्य-प्रशासनं शिक्षकाणां विश्वासघातं करोतीति सः आरोपयन् टी. एम. सी. इत्यस्य शासनकाले शिक्षाक्षेत्रं सर्वाधिकतया बाधितम् अभवत् इत्यपि सः आरोपितवान्।

प्रधानमन्त्री इण्डिया-एआई-इम्पैक्ट-एक्सपो 2026:

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदेहल्यां इण्डिया-एआई-इम्पैक्ट-एक्सपो विंशतिः-षड्विंशतिः इत्यस्य उद्घाटनं करिष्यति। पञ्चदिवसीयां प्रदर्शनीं इण्डिया-एआई-इम्पैक्ट-समिट विंशतिः-षड्विंशतिः इत्यस्य पार्श्वे आयोजितं भवति, यत्र क्रियमाणस्य आर्टिफिसियल-इन्टेलिजेन्स इत्यस्य राष्ट्रियप्रदर्शनरूपेण कार्यं करिष्यति। अस्मिन् आस्ट्रेलिया, जापान, रशिया, ब्रिटेन, फ़्रान्स, जर्मनी, इटली, नीदरलैंड्स्, स्विट्ज़लैंड, सर्बिया, एस्टोनिया, ताजिकिस्तान्, आफ़्रिका इत्यादयः त्रयोदश-देशाः एआई-ईकोसिष्टम इति व्यवस्थायां अन्ताराष्ट्रियसहयोगं प्रदर्शयन्ति।

क्रिकेट

पुरुषाणां टी-20 क्रिकेट्-विश्वकप इति क्रीडायां, अद्य सायङ्काले कोलम्बो-नगरे बहुप्रतिक्षितायां ग्रूप्-ए इत्यस्य स्पर्धायां भारतं पाकिस्तानेन सह क्रीडिष्यति; वेस्ट्-इण्डीज्-देशः नेपाल-देशम् नव विकेट इत्यनेन पराजित्य सूपर्-एट्स इति अन्तिमाष्ट-दलीय चक्रे प्रवेष्टुं प्राथम्यम् अलभत्

।। इति वार्ता: ।।